श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ चतुर्थस्कन्धे षष्ठोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ चतुर्थस्कन्धे षष्ठोऽध्यायः ॥

मैत्रेय उवाच
अथ देवगणाः सर्वे रुद्रानीकैः पराजिताः।
शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः॥ 1 ॥

सञ्छिन्नभिन्नसर्वाङ्गाः सर्त्विक्सभ्या भयाकुलाः।
स्वयम्भुवे नमस्कृत्य कात्स्र्न्येनैतन्न्यवेदयन्॥ 2 ॥

उपलभ्य पुरैवैतद्भगवानब्जसम्भवः।
नारायणश्च विश्वात्मा न कस्याध्वरमीयतुः॥ 3 ॥

तदाकर्ण्य विभुः प्राह तेजीयसि कृतागसि।
क्षेमाय तत्र सा भूयान्न प्रायेण बुभूषताम्॥ 4 ॥

अथापि यूयं कृतकिल्बिषा भवं
    ये बर्हिषो भागभाजं परादुः।
प्रसादयध्वं परिशुद्धचेतसा
    क्षिप्रप्रसादं प्रगृहीताङ्घ्रिपद्मम्॥ 5 ॥

आशासाना जीवितमध्वरस्य
    लोकः सपालः कुपिते न यस्मिन्।

तमाशु देवं प्रियया विहीनं
    क्षमापयध्वं हृदि विद्धं दुरुक्तैः ॥ 6 ॥

नाहं न यज्ञो न च यूयमन्ये
    ये देहभाजो मुनयश्च तत्त्वम् ।
विदुः प्रमाणं बलवीर्ययोर्वा
    यस्यात्मतन्त्रस्य क उपायं विधित्सेत् ॥ 7 ॥

स इत्थमादिश्य सुरानजस्तैः
    समन्वितः पितृभिः सप्रजेशैः ।
ययौ स्वधिष्ण्यान्निलयं पुरद्विषः
    कैलासमद्रिप्रवरं प्रियं प्रभोः ॥ 8 ॥

जन्मौषधितपोमन्त्रयोगसिद्धैर्नरेतरैः ।
जुष्टं किन्नरगन्धर्वैरप्सरोभिर्वृतं सदा ॥ 9 ॥

नानामणिमयैः शृङ्गैर्नानाधातुविचित्रितैः ।
नानाद्रुमलतागुल्मैर्नानामृगगणावृतैः ॥ 10 ॥

नानामलप्रस्रवणैर्नानाकन्दरसानुभिः ।
रमणं विहरन्तीनां रमणैः सिद्धयोषिताम् ॥ 11 ॥

मयूरकेकाभिरुतं मदान्धालिविमूर्च्छितम् ।
प्लावितै रक्तकण्ठानां कूजितैश्च पतत्त्रिणाम् ॥ 12 ॥

आह्वयन्तमिवोद्धस्तैर्द्विजान् कामदुघैर्द्रुमैः ।
व्रजन्तमिव मातङ्गैर्गृणन्तमिव निर्झरैः ॥ 13 ॥

मन्दारैः पारिजातैश्च सरलैश्चोपशोभितम् ।
तमालैः शालतालैश्च कोविदारासनार्जुनैः ॥ 14 ॥

चूतैः कदम्बैर्नीपैश्च नागपुन्नागचम्पकैः।
पाटलाशोकबकुलैः कुन्दैः कुरबकैरपि॥ 15॥

स्वर्णार्णशतपत्रैश्च वररेणुकजातिभिः।
कुब्जकैर्मल्लिकाभिश्च माधवीभिश्च मण्डितम्॥ 16॥

पनसोदुम्बराश्वत्थप्लक्षन्यग्रोधहिङ्गुभिः।
भूर्जैरोषधिभिः पूगै राजपूगैश्च जम्बुभिः॥ 17॥

खर्जूराम्रातकाम्राद्यैः प्रियालमधुकेङ्गुदैः।
द्रुमजातिभिरन्यैश्च राजितं वेणुकीचकैः॥ 18॥

कुमुदोत्पलकह्लारशतपत्रवनर्द्धिभिः।
नलिनीषु कलं कूजत्खगवृन्दोपशोभितम्॥ 19॥

मृगैः शाखामृगैः क्रोडैर्मृगेन्द्रैर्ऋक्षशल्यकैः।
गवयैः शरभैर्व्याघ्रै रुरुभिर्महिषादिभिः॥ 20॥

कर्णान्त्रैकपदाश्वास्यैर्निर्जुष्टं वृकनाभिभिः।
कदलीषण्डसंरुद्धनलिनीपुलिनश्रियम्॥ 21॥

पर्यस्तं नन्दया सत्याः स्नानपुण्यतरोदया।
विलोक्य भूतेशगिरिं विबुधा विस्मयं ययुः॥ 22॥

ददृशुस्तत्र ते रम्यामलकां नाम वै पुरीम्।
वनं सौगन्धिकं चापि यत्र तन्नाम पङ्कजम्॥ 23॥

नन्दा चालकनन्दा च सरितौ बाह्यतः पुरः।
तीर्थपादपदाम्भोजरजसातीव पावने॥ 24॥

ययोः सुरस्त्रियः क्षत्तरवरुह्य स्वधिष्ण्यतः।
क्रीडन्ति पुंसः सिञ्चन्त्यो विगाह्य रतिकर्शिताः॥ 25॥

ययोस्तत्स्नानविभ्रष्टनवकुङ्कुमपिञ्जरम्।
वितृषोऽपि पिबन्त्यम्भः पाययन्तो गजा गजीः॥ **26** ॥

तारहेममहारत्नविमानशतसङ्कुलाम्।
जुष्टां पुण्यजनस्त्रीभिर्यथा खं सतडिद्घनम्॥ **27** ॥

हित्वा यक्षेश्वरपुरीं वनं सौगन्धिकं च तत्।
द्रुमैः कामदुघैर्हृद्यं चित्रमाल्यफलच्छदैः॥ **28** ॥

रक्तकण्ठखगानीकस्वरमण्डितषट्पदम्।
कलहंसकुलप्रेष्ठखरदण्डजलाशयम्॥ **29** ॥

वनकुञ्जरसङ्घृष्टहरिचन्दनवायुना।
अधि पुण्यजनस्त्रीणां मुहुरुन्मथयन्मनः॥ **30** ॥

वैदूर्यकृतसोपाना वाप्य उत्पलमालिनीः।
प्राप्ताः किम्पुरुषैर्दृष्ट्वा त आराद्ददृशुर्वटम्॥ **31** ॥

स योजनशतोत्सेधः पादोनविटपायतः।
पर्यक्कृताचलच्छायो निर्नीडस्तापवर्जितः॥ **32** ॥

तस्मिन्महायोगमये मुमुक्षुशरणे सुराः।
ददृशुः शिवमासीनं त्यक्तामर्षमिवान्तकम्॥ **33** ॥

सनन्दनाद्यैर्महासिद्धैः शान्तैः संशान्तविग्रहम्।
उपास्यमानं सख्या च भर्त्रा गुह्यकरक्षसाम्॥ **34** ॥

विद्यातपोयोगपथमास्थितं तमधीश्वरम्।
चरन्तं विश्वसुहृदं वात्सल्याल्लोकमङ्गलम्॥ **35** ॥

लिङ्गं च तापसाभीष्टं भस्मदण्डजटाजिनम्।
अङ्गेन सन्ध्याभ्ररुचा चन्द्रलेखां च बिभ्रतम्॥ **36**॥

उपविष्टं दर्भमय्यां बृस्यां ब्रह्म सनातनम्।
नारदाय प्रवोचन्तं पृच्छते शृण्वतां सताम्॥ **37**॥

कृत्वोरौ दक्षिणे सव्यं पादपद्मं च जानुनि।
बाहुं प्रकोष्ठेऽक्षमालामासीनं तर्कमुद्रया॥ **38**॥

तं ब्रह्मनिर्वाणसमाधिमाश्रितं
    व्युपाश्रितं गिरिशं योगकक्षाम्।
सलोकपाला मुनयो मनूना -
    माद्यं मनुं प्राञ्जलयः प्रणेमुः॥ **39**॥

स तूपलभ्यागतमात्मयोनिं
    सुरासुरेशैरभिवन्दिताङ्घ्रिः।
उत्थाय चक्रे शिरसाभिवन्दन -
    मर्हत्तमः कस्य यथैव विष्णुः॥ **40**॥

तथापरे सिद्धगणा महर्षिभि -
    र्ये वै समन्तादनु नीललोहितम्।
नमस्कृतः प्राह शशाङ्कशेखरं
    कृतप्रणामं प्रहसन्निवात्मभूः॥ **41**॥

ब्रह्मोवाच
जाने त्वामीशं विश्वस्य जगतो योनिबीजयोः।
शक्तेः शिवस्य च परं यत्तद्ब्रह्म निरन्तरम्॥ **42**॥

त्वमेव भगवन्नेतच्छिवशक्त्योः सरूपयोः।
विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा॥ **43**॥

त्वमेव धर्मार्थदुघाभिपत्तये
    दक्षेण सूत्रेण ससर्जिथाध्वरम्।
त्वयैव लोकेऽवसिताश्च सेतवो
    यान्ब्राह्मणाः श्रद्दधते धृतव्रताः॥ **44** ॥

त्वं कर्मणां मङ्गल मङ्गलानां
    कर्तुः स्म लोकं तनुषे स्वः परं वा।
अमङ्गलानां च तमिस्रमुल्बणं
    विपर्ययः केन तदेव कस्यचित्॥ **45** ॥

न वै सतां त्वच्चरणार्पितात्मनां
    भूतेषु सर्वेष्वभिपश्यतां तव।
भूतानि चात्मन्यपृथग्दिदृक्षतां
    प्रायेण रोषोऽभिभवेद्यथा पशुम्॥ **46** ॥

पृथग्धियः कर्मदृशो दुराशयाः
    परोदयेनार्पितहृद्रुजोऽनिशम्।
परान् दुरुक्तैर्वितुदन्त्यरुन्तुदा -
    स्तान्मा वधीद्दैव वधान् भवद्विधः॥ **47** ॥

यस्मिन् यदा पुष्करनाभमायया
    दुरन्तया स्पृष्टधियः पृथग्दृशः।
कुर्वन्ति तत्र ह्यनुकम्पया कृपां
    न साधवो दैवबलात्कृते क्रमम्॥ **48** ॥

भवांस्तु पुंसः परमस्य मायया
    दुरन्तयास्पृष्टमतिः समस्तदृक्।
तया हतात्मस्वनुकर्मचेतः -
    स्वनुग्रहं कर्तुमिहार्हसि प्रभो॥ **49** ॥

कुर्वध्वरस्योद्धरणं हतस्य भो -
    स्त्वयासमाप्तस्य मनो प्रजापतेः।
न यत्र भागं तव भागिनो ददुः
    कुयज्विनो येन मखो निनीयते॥ **50** ॥

जीवताद्यजमानोऽयं प्रपद्येताक्षिणी भगः।
भृगोः श्मश्रूणि रोहन्तु पूष्णो दन्ताश्च पूर्ववत्॥ **51** ॥

देवानां भग्नगात्राणामृत्विजां चायुधाश्मभिः।
भवतानुगृहीतानामाशु मन्योऽस्त्वनातुरम्॥ **52** ॥

एष ते रुद्र भागोऽस्तु यदुच्छिष्टोऽध्वरस्य वै।
यज्ञस्ते रुद्रभागेन कल्पतामद्य यज्ञहन्॥ **53** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
चतुर्थस्कन्धे रुद्रसान्त्वनं नाम षष्ठोऽध्यायः॥